# पौरस्त्यदर्शनाभिमतप्रामाण्यवादविवेकः

**उमेशप्रसादघिमिरे (विद्यावारिधिः)**

*उपप्राध्यापकः, वाल्मीकिविद्यापीठम्*

ug2umesh@gmail.com

**शोधसारः**

*प्रपूर्वकान्माङ्माने-धातोर्ल्युटि निष्पन्नात् 'ष्यञ्' प्रत्यये कृते प्रामाण्यमिति शब्दो निष्पद्यते । अर्थात् प्रमाणस्य भावः, धर्मविशेषो वा प्रामाण्यमुच्यते । प्रामाण्यस्य वादः प्रामाण्यवादः। प्रत्यक्षादिप्रमाणैः सर्वविधज्ञानानामुपलब्धिर्भवति । तत्र ज्ञानानां प्रामाण्याप्रामाण्यविषये पौरस्त्यदर्शनकारा मिथो विवदन्ते । पौरस्त्यज्ञानमीमांसायां समस्येयमुत्पन्ना भवति यज्ज्ञानमुत्पद्यते तद्यथार्थमयथार्थं वा ? तज्ज्ञानस्य परीक्षा कथं भवति ? अर्थात् प्रामाण्यस्याप्रामाण्यस्य चोत्पत्तिः किं स्वतः परतो वेति विवादविषयः । तथा तयोर्ज्ञप्तिरपि किं स्वतः परतो वेति प्रश्नः समुपस्थितः। तत्र न्याय-वैशेषिक-साङ्ख्य-जैन-बौद्ध-मीमांसा-वेदान्तादिदर्शनेषु पर्याप्तं मतवैषम्यमवलोक्यते । तत्रापि वैशेषिका नैयायिका बौद्धाश्च प्रामाण्यस्योत्पत्तिं ज्ञप्तिञ्च परत इत्यङ्गीकुर्वन्ति । मीमांसका वेदान्तिनश्च स्वत इत्यङ्गीकुर्वन्ति । अप्रामाण्यस्य तूत्पत्तिर्ज्ञप्तिश्च परत एवेति प्रायः समेषां पौरस्त्यदार्शनिकानां मतैक्यम् । बौद्धदार्शनिकास्त्वप्रामाण्यस्योत्पत्तिः स्वत इति कथयन्ति । तथा साङ्ख्या अप्रामाण्यस्य ज्ञप्तिः स्वत इति प्रतिपादयन्ति । जैनदार्शनिकास्तु प्रामाण्यस्याप्रामाण्यस्य चोत्पत्तौ परतस्त्वमङ्गीकुर्वन्ति चेज्ज्ञप्तौ त्वभ्यस्तस्थले स्वतस्त्वमनभ्यस्तस्थले परतस्त्वमित्यङ्गीकुर्वन्ति । एवं प्रामाण्यवादस्य स्वतस्त्वपरस्त्वभेदेन द्वैविध्यमत्रोहापोहरूपेण विवेचितम् । पौरस्त्यदर्शनेषु विकसितं प्रामाण्यवादमाश्रित्य स्वतः प्रामाण्यवादस्य, परतः प्रामाण्यवादस्य, अप्रामाण्यवादस्य च स्वरूपं वैशिष्ट्यं पृथकत्वाञ्चात्र लेखे निर्धारितम् ।*

**प्रमुखशब्दाः**

प्रमा, प्रमेयम्, प्रमाणम्, स्वतः प्रामाण्यवादः, परतः प्रामाण्यवादः, अप्रामाण्यवादः ।

## विषयपरिचयः

प्रमाणजन्यज्ञानस्य वैधत्वनिर्णयाय पौरस्त्यदर्शनज्ञानमीमांसायां विकसितो महत्त्वपूर्णः सिद्धान्त एव प्रामाण्यवादोऽस्ति । ज्ञानस्य प्रामाण्यं ज्ञानेन सहैव स्वत उत्पद्यते ? अथवा ज्ञानप्राप्त्यनन्तरं परत उत्पद्यत इति प्रामाण्यवादसम्बद्धा प्रमुखा समस्या विद्यते । एवमेव ज्ञानस्याप्रामाण्यमपि स्वत उत्पद्यते परतो वेति समस्या च प्रस्तुतप्रमुखसमस्यायामेवान्तर्भूता भवति । अस्याः समस्यायाः समाधानार्थमेव प्रामाण्यवादो विकसितो विद्यते । तत्त्वज्ञानप्रतिपादनपरेषु पौरस्त्यदर्शनेषु प्रमाणचिन्तनक्रमे तत्तद्दार्शनिकैस्तत्तत्प्रमाणानां वैधतानिर्धारणाय प्रामाण्यस्वरूपमूहापोहरूपेण विवेचितमुपलभ्यते । तस्यैव प्रामाण्यवादस्य समीक्षणात्मकं विवेचनमत्र लेखे विहितमस्ति

। अर्थात् प्रमाणैर्यज्ज्ञानमुत्पद्यते तस्य प्रामाण्यस्याप्रामाण्यस्य च साधकं किं ? प्रामाण्यस्य स्वतस्त्वं परतस्त्वं वेति समस्याशमनायात्रानुसन्धानमूलकः प्राज्ञिक आयासो विहितोऽस्ति।

## शोधसमस्या

'पौरस्त्यदर्शनाभिमतप्रामाण्यवादविवेकः' इति शीर्षकनिर्दिष्टा समस्यैव शोधलेखस्य प्रधानाऽखण्डा वा समस्या विद्यते। अनया प्रधानसमस्यया सम्बद्धे द्वे समस्येऽधोलिखिते स्तः-

१. पौरस्त्यदर्शनाभिमतप्रामाण्यस्वरूपं किम् ?

२. पौरस्त्यदर्शनाभिमतप्रामाण्यभेदः कीदृशः ?

## शोधोद्देश्यम्

'पौरस्त्यदर्शनाभिमतप्रामाण्यवादविवेकः' इति शीर्षकनिर्दिष्टसमस्यायाः समाधानमेवास्य शोधलेखस्य प्रधानमखण्डञ्चोद्देश्यम्। अनेन प्रधानोद्देश्येन सम्बद्धे द्वे उद्देश्येऽधोलिखिते स्तः -

१.पौरस्त्यदर्शनाभिमतप्रामाण्यस्वरूपप्रदर्शनम्,

२.पौरस्त्यदर्शनाभिमतप्रामाण्यभेदनिर्धारणम्।

## शोधसीमा

'पौरस्त्यदर्शनाभिमतप्रामाण्यवादविवेकः' इति शीर्षकीयोऽयमालेखः पौरस्त्यदर्शनक्षेत्रमाधृत्य विलिखितोऽस्ति । पौरस्त्यदर्शनेषु जैन-बौद्ध-न्याय-साङ्ख्य-मीमांसा-वेदान्तदर्शनप्रतिपादितप्रामाण्यवादानामेवात्र स्वरूपभेदप्रदर्शनपूर्वकं विवेचनं कृतमस्ति । ततोऽतिरिक्तदर्शनसम्मतप्रामाण्यस्य चर्चा नैव विहितेति शोधलेखस्यास्य सीमा क्षेत्रञ्च । पौरस्त्यदर्शनाभिमतानां प्रामाण्यस्वरूपभेदादीनामेकत्राध्ययनमत्रविहितमिति पूर्वकृताध्ययनानुसन्धानात्मककार्येभ्योऽस्य शोधलेखस्यौचित्यञ्च स्पष्टम्।

## अध्ययनविधिः

गुणात्मकप्रकृतिके प्रस्तुतशोधाध्ययने सम्बद्धसामग्रीणां सङ्कलनं पुस्तकालयीयकार्याद् विहितमस्ति । पौरस्त्यदर्शनेषु प्राप्तानि प्रामाण्यवादसम्बद्धानि चिन्तनान्येव प्रमुखसामग्रीत्वेनात्र गृहीतानि । तासां प्रामाण्यवादसम्बद्धसामग्रीणां निर्मलीकरणार्थं व्यवस्थापनार्थं वा गुणात्मकविध्यनुकूला वर्णनात्मकविश्लेषणात्मकतुलनात्मकविधयः प्रमुखतया संप्रयुक्ताः । पौरस्त्यदर्शनशास्त्रप्रतिपादितप्रामाण्यवादं केन्द्रीकृत्य वस्तुविश्लेषणनिष्कर्षोपस्थापनादिकं विहितमिति निगमनात्मकविधिश्चात्र स्वाभाविकतया प्रयुक्तोऽस्ति।

## सैद्धान्तिक आधारः

'पौरस्त्यदर्शनाभिमतप्रामाण्यवादविवेकः' शीर्षकीयः शोधलेखोऽसौ दर्शनसम्बद्धो विद्यते । अतः पौरस्त्यदर्शनान्येवास्याध्ययनस्य सैद्धान्तिक आधारो विद्यते। पौरस्त्यदर्शनसम्बद्धान् शास्त्रीयग्रन्थानाधृत्य विषयोपस्थानं विवेचनं निष्कर्षोपस्थापनञ्चात्र विहितमस्ति । अतो विश्लेषणस्य सैद्धान्तिक आधारः पौरस्त्यदर्शनानां प्रामाण्यवादसम्बद्धाः सिद्धान्ताः सन्ति । 'सिद्धोऽन्तो यस्य सः' इति बहुव्रीहिसमासेन निष्पन्नस्य सिद्धान्तशब्दस्य

तात्पर्यमपि पूर्वस्थापितः सिद्धान्त एवेति पौरस्त्यदार्शनिकैः (जैन-बौद्ध-नैयायिक-साङ्ख्य-मीमांसक-वेदान्तिभिः) सुचिन्तिताः प्रामाण्यवादसम्बद्धाः (अप्रामाण्यवादस्वतःप्रामाण्यवादपरतःप्रामाण्यवादाः) सिद्धान्ता एवास्य शोधाध्ययनस्य सैद्धान्तिक आधारोऽस्ति ।

## विषयोपक्रमः

मानाधीना मेयसिद्धिरिति पौरस्त्यदर्शनस्य मान्यता विद्यते । तत्त्वज्ञानमाध्यमेन दुःखात्यन्तनिवृत्तिरूपः सुखावाप्तिरूपो वा परमपुरुषार्थलाभः पौरस्त्यदर्शनप्रयोजनम् । तत्त्वज्ञानप्रतिपादनपरेषु सर्वेष्वपि पौरस्त्यदर्शनेषु प्रमाणचिन्तनं विहितम् । तच्च तत्त्वज्ञानमनधिगताबाधितविषयज्ञानरूपप्रमापदवाच्यम् । प्रमायाः करणमेव प्रमाणम् । प्रमीयतेऽनेनेति व्युत्पत्त्या प्रमाणपदोमिदं ज्ञानसाधनवाचकं विद्यते । प्रमातुं योग्यः प्रमेयः, स च ज्ञानविषयः । ज्ञानस्य योऽधिकारी ज्ञाता वा स प्रमाता । एवं प्रमा, प्रमाणम्, प्रमेयः, प्रमाता चेति ज्ञानाधारत्वेन पौरस्त्यदार्शनिकैः स्वीकृतम् । ज्ञानसाधनत्वेन प्रमाणस्यावश्यकतेति विषये समेषां दार्शनिकानां मतैक्यम् । प्रमाकरणानां प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिरूपाणां तत्त्वावेदकत्वं (स्वरूपविषयकबोधजनकत्वम्) एव प्रामाण्यमुच्यते । अर्थात् प्रमाणस्य भाव एव प्रामाण्यम् । प्रमाणशब्दात् 'ष्यञ्' प्रत्यये कृते प्रमाण्यमिति शब्दो निष्पद्यते । वदतीतिवादः । प्रामाण्यं वदतीति प्रामाण्यवादः। अस्य प्रामाण्यवादस्य स्वरूपविषये भेदोपभेदविषये च पौरस्त्यदार्शनिकेषु प्रशस्तं मतवैषम्यमवलोक्यते । अत्र प्रामाण्यवादचिन्तनक्रमे तत्तद्दार्शनिकैश्चिन्तितं प्रामाण्यस्वरूपं युक्तिप्रमाणाभ्यां निरूपितम् । प्रामाण्यविषयकं चिन्तनं पौरस्त्यदर्शनवाङ्मये कथमुद्भूतं पुष्पितं पल्लवितं विकसितञ्चेति प्राज्ञिकजिज्ञासासमाधानाय शोधलेखेऽस्मिन् प्रयासो विहितोऽस्ति । अतः शोधलेखोऽयं पौरस्त्यदर्शनाभिमतप्रामाण्यस्वरूपनिर्धारणलक्ष्यीभूतो विद्यते ।

## पौरस्त्यदर्शनाभिमतप्रामाण्यवादभेदविवेकः

प्रमाणस्य भावः, धर्मविशेषो वा प्रामाण्यमुच्यते । यथार्थज्ञानस्य प्रमात्वमेव प्रामाण्यमस्ति । संशयरहिते निश्चयात्मके यथार्थानुभवे वा विद्यमानो धर्मविशेषः प्रामाण्यमुच्यते । यः पदार्थो येन रूपेणावभासितोऽवस्थितो वा तस्याव्यभिचरितत्वं स्यात् । प्रामाण्यवादमाश्रित्य पौरस्त्यदर्शनेष्वनेकसिद्धान्ताः स्थापिताः सन्ति । प्रामाण्यस्य स्वतस्त्वे परतस्त्वे च दर्शनेषु मतभेदाः प्राप्यन्ते, तथा चोक्तम्-

'प्रमाणत्वाप्रमाणत्वे स्वतः साङ्ख्याः समाश्रिताः ।
नैयायिकास्ते परतः सौगताश्चरमं स्वतः ।
प्रथमं परतः प्राहुः प्रामाण्यं वेदवादिनः ।
प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम् ।'(सर्वदर्शनसङ्ग्रहः,जैमिनिदर्शनम्, पृ.४७६)

अर्थात् साङ्ख्यदर्शनदृष्ट्या प्रमाणत्वाप्रमाणत्वयोर्द्वयोरुत्पत्तिः स्वतो भवति । नैयायिकदृष्ट्या प्रमाणत्वाप्रमाणत्वयोर्द्वयोः परतस्त्वम् । बौद्धमते प्रमाण्यं परतः, अप्रामाण्यञ्च स्वत इत्युच्यते । मीमांसकमते प्रामाण्यस्योत्पत्तिः स्वतः, अप्रामाण्यस्य चोत्पत्तिः परत इति ज्ञायते । वेदान्तदर्शनमपि मीमांसादर्शनवत् प्रामाण्यस्य स्वतस्त्वन्तथाऽप्रामाण्यस्य परतस्त्वमेव प्रतिपादयति । एवं प्रामाण्यवादविषयकमतभेद इत्थं प्रदर्शयितुं शक्यते-

१. प्रामाण्यं स्वतः, अप्रामाण्यञ्च स्वत इति साङ्ख्यमतम् ।

२. प्रामाण्यं परतः, अप्रामाण्यञ्च परत इति न्यायमतम् ।

३. प्रामाण्यं परतः, अप्रामाण्यञ्च स्वत इति बौद्धमतम् ।

४. प्रामाण्यं स्वतः, अप्रामाण्यञ्च परत इति मीमांसामतम् ।

५.प्रामाण्यं स्वतः, अप्रामाण्यं परत इति वेदान्तमतम् ।

## प्रामाण्यवादस्योद्भवो विकासश्च

पौरस्त्यज्ञानमीमांसायां प्रामाण्यवादोऽयं केन्द्रीयविषयरूपेण समुपस्थितोऽस्ति । प्रामाण्यवादसम्बन्धे मूलप्रश्नोऽयं विद्यते-कस्यापि ज्ञानस्य केनाधारेण प्रामाणिकत्वमप्रामाणिकत्वं वेति निश्चयः ? दर्शनपरम्परायां प्रामाण्यविषयिणीयं समस्या वेदानां प्रामाणिकत्वप्रश्नेन सह सम्बद्धा विद्यते । वेदविहितयज्ञयागादीनां स्वर्गाद्यभीष्टफलसिद्धीनाञ्च प्रमाणीकरणमिन्द्रियजन्यप्रत्यक्षेण प्रत्यक्षाधारितान्यप्रमाणेन च नैव सम्भवति, अत एवैतज्ज्ञानस्य स्वतः प्रमाणत्वमेव । मीमांसका वेदान्तिनश्च वेदानामपौरुषेयत्वं देशकालातीतत्वञ्चाङ्गीकुर्वन्ति । वेदानां स्वत:प्रामाण्यञ्चाङ्गीकुर्वन्ति । वैदिकपरम्पराभिन्नबौद्धपरम्परायान्तु वेदानां परतः प्रामाण्यमङ्गीक्रियते । व्यवहारिकप्रमाणेनैव वेदानां प्रामाण्यं साधनीयमिति तन्मतम् । इत्थं दर्शनपरम्परायां वेदाः स्वतः प्रमाणम्, परतः प्रमाणं वेति समस्या प्रादुर्भूता । कालान्तरे गत्वाऽस्मिन् विषयेऽनेकसिद्धान्ता विकसिताः । प्रामाण्यसम्बद्धाः सिद्धान्ता एव प्रामाण्यवादेन प्रतिष्ठिताः ।

एवं प्रारम्भकाले वेदस्य प्रामाण्यमप्रामाण्यं वेति विवाद आसीत् । पश्चात् प्रत्यक्षादिप्रमाणानामपि प्रामाण्यं न वेति तर्क: समुपस्थापितः । इदानीं समेषामपि प्रमाणानां स्वतस्त्वपरतस्त्वविषयिणी चर्चा प्रारब्धा । इयञ्च चर्चा मुख्यतयोत्पत्तिदृष्ट्या ज्ञप्तिदृष्ट्या च विधीयते । पौरस्त्यज्ञानमीमांसायां सर्वप्रथमं प्रामाण्यस्य चर्चा केनाचार्येण विहितेति निश्चित्य वक्तुं काठिन्यमस्ति किन्तु पौरस्त्यदार्शनिकसम्प्रदायविकासस्येतिहासादेवास्य विचारस्य विकासक्रम इति रेखाङ्कनं कर्तुं शक्यते ।

मीमासकाचार्यः कुमारिलभट्टः, बौद्धाचार्योधर्मकीर्तिश्च समकालिकाविति मन्यते । एवं प्रभाकरमिश्रोऽपि समकालिक एवेति तर्क्यते । तैराचार्यैः स्वस्वग्रन्थेषु प्रामाण्यवादस्य चर्चा कृतोपलभ्यते । वेदस्य प्रामाणिकत्वसाधनाय सर्वप्रथमं जैमिनिना मीमांसासूत्रेषु प्रामाण्यवादस्य बीजमुपस्थापितम्, शाबरभाष्ये तद्बीजमङ्कुरितम्, कुमारिलप्रभाकरादिमाध्यमेन विपुलवृक्षरूपेण प्रामाण्यवादः पुष्पितः, पल्लवितः, सुविकसितश्चेति वक्तुं शक्यते ।

जैनदर्शनकालेऽप्याचार्येण कुन्दुकेन 'प्रवचनसारः' इति ग्रन्थे प्रत्यक्षपरोक्षप्रमाणयोः सामान्यलक्षणं विहितम् । तस्योत्तराधिकारिणोमास्वातिना 'तत्त्वार्थसूत्रम्' इति ग्रन्थे ज्ञानविषयकं चिन्तनं विहितम् । तत्पश्चात् समन्तभद्रस्वामिना सिद्धसेनदिवाकरेण च प्रमाणविषयकं चिन्तनं विहितम् । एवमेव अकलङ्क-माणिक्यनन्दी-प्रभाचन्द्रादिभ्य आचार्येभ्यश्च प्रामाण्यवादस्य चर्चा विहिताऽस्तीति द्वादशशताब्दीकालिकेनाचार्येण हेमचन्द्रसूरिणा लिखितस्य 'प्रमाणमीमांसा' ग्रन्थस्यावलोकनाज्ज्ञायते । एवं बौद्धदर्शनस्य प्रथमं प्रस्फुटनं दिङ्नागस्य ग्रन्थेऽभूत्, दिङ्नागपूर्वमपि वसुबन्धोः 'अभिधर्मकोशः' इति ग्रन्थेऽपि प्रमाणानां संक्षिप्तं विवेचनमुपलभ्यते । वस्तुतो बौद्धदर्शनवाङ्मये प्रामाण्यवादस्य पूर्णं प्रस्फूटनं तु शान्तरक्षितस्य तत्त्वसङ्ग्रहे, कमलशीलस्य तत्त्वसङ्ग्रहपञ्जिकायाञ्चाभूदिति वक्तुं शक्यते ।

न्यायदर्शनस्य प्रारम्भ एव तर्कशास्त्रेण सहाभूत् । गौतमस्य न्यायसूत्रादिदं दर्शनमारब्धम् । गौतमसूत्रोपरि वात्स्यायनेन लिखिते भाष्ये प्रमाणविषयकं गूढं विवेचनमवाप्यते । तत्राऽपि प्रामाण्यविवेचनं तु नैवदृश्यते । प्रामाण्यवादस्य बीजरूपोल्लेखः सर्वप्रथमं उद्योतकरेण विहितोऽस्ति । तत्र प्रवृत्तेः सफलत्वमसफलत्वञ्चेति चर्चा प्राप्यते । तदनुसारं यदा प्रमाता प्रमाणेनार्थनिश्चयपूर्वकं कस्मिन्नपि कार्ये प्रवृत्तो भवति, तदा प्रवृत्तिः सफला भवति । यदा

च प्रमाणाभासेनार्थनिश्चयं कृत्वा प्रमाता प्रवर्तते तर्हि प्रवृत्तिरसफला भवति । 'प्रमाणतोऽर्थप्रतिपत्तौ' इत्यादिभाष्यवचनव्याख्याक्रमे उदयनाचार्येण ज्ञानस्य प्रामाण्याप्रामाण्यविषयेऽपेक्षाकृतं स्पष्टं विवेचनं विहितम् । एवं गङ्गेशोपाध्यायरघुनाथशिरोमणिगदाधरभट्टाचार्यजयन्तभट्टादिभिर्न्यायाचार्यैः प्रामाण्यवादस्य विवेचनं विहितम् ।

न्यायदर्शनस्य पूर्ववर्तित्वेन वैशेषिकदर्शनमङ्गीक्रियते । कणादविरचिते वैशेषिकसूत्रे 'तद्वचनादाम्नायस्य प्रामाण्यम्' (वैशेषिकसूत्रम् १/१/३) इत्युक्त्वा वेदस्य प्रामाणिकत्वसन्दर्भे प्रामाण्यशब्दस्य व्यवहार: कृतोऽस्ति । प्रशस्तपादभाष्यटीकायां न्यायमञ्जर्यां श्रीधरभट्टेन प्रामाण्यवादस्य चर्चा कृताऽस्ति । पौरस्त्यास्तिकदर्शनेषु कपिलमुनिप्रणीतस्य साङ्ख्यदर्शनस्य सर्वप्राचीनत्वमङ्गीक्रियते । एतस्य दर्शनस्य साङ्ख्यकारिकेति प्रसिद्धग्रन्थ: । एतस्मिन् ग्रन्थे प्रमाण्यविषयकं चिन्तनन्तु नैवोपलभ्यते तथापि साङ्ख्यदर्शनं स्वत़प्रामाण्यवादि मन्यते । एवमेव वेदान्तदर्शनपरम्परायां चित्सुखमुनिना तत्त्वप्रदीपिकायाम्, विद्यारण्यमुनिना विवरणप्रमेयसङ्ग्रहे, धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायाञ्च प्रामाण्यवादस्यापेक्षाकृतं विस्तृतं विवेचनमुपलभ्यते ।

## साङ्ख्यदर्शनाभिमतप्रामाण्यवादविवेक:

साङ्ख्यदर्शनं स्वतः प्रमाण्यवादिदर्शनमस्ति । साङ्ख्यदर्शनस्य प्रसिद्धे साङ्ख्यकारिकेतिग्रन्थे प्रमाणलक्षणं नैव दत्तमपि तु प्रमाणभेदः प्रदर्शितः, यथा- 'दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् । त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥' (साङ्ख्यकारिका -४) अत्र दृष्टमनुमानमाप्तवचञ्चेति त्रिविधं प्रमाणं सङ्केतितम्, प्रमाणादेव प्रमेयसिद्धिर्भवतीति प्रतिपादितञ्च । साङ्ख्यकारिकोपरि वाचस्पतिमिश्रेण साङ्ख्यतत्त्वकौमुदी नाम्नी टीका कृताऽस्ति, तत्रापि प्रामाण्यचर्चा नैव विहिता । प्रमाया लक्षणं विहितमस्ति, तेन यथार्थज्ञानस्य स्पष्टं स्वरूपं प्राप्यते । प्रमालक्षणञ्च यथोल्लिखितम् - 'असंदिग्धाविपरीतानधिगतविषया चित्तवृत्तिः, बोधश्च पौरुषेयः फलं प्रमा ।' (साङ्ख्यतत्त्वकौमुदी,कारिका-४) अर्थात् सन्देहरहिता, भ्रान्तिरहिता, अज्ञातार्थविषया या चित्तवृत्तिरस्ति, तयाऽभिन्नो यः पौरुषेय: बोधोऽस्ति स एव प्रमेत्युच्यते । एतेन यथार्थज्ञानस्य स्वरूपमवश्यं दृष्टिगोचरं भवति किन्तु तस्य यथार्थत्वस्य निश्चय: कथमिति नैवावज्ञायते । आप्तवचनस्य व्याख्याक्रमे वाचस्पतिमिश्रेण वेदस्य स्वत:प्रामाण्यं निर्दिष्टम्- 'तच्च स्वत: प्रमाणम्, अपौरुषेयवाक्यनियतत्वेन सकलदोषाऽऽशङ्काविनिर्मुक्तेर्युक्तं भवति ।' (साङ्ख्यतत्त्वकौमुदीकारिका-५) अत्रैव साङ्ख्यदर्शनाभिमतप्रामाण्यवादविषयकसिद्धान्तबीजमुपलब्धमस्ति । साङ्ख्यमतानुसारं प्रामाण्याप्रामाण्ययोर्द्वयोरपि स्वतस्त्वमेव । तच्च कुमारिलभट्टेन यथा सङ्केतितम्-'केचिदाहुर्द्वयं स्वत: ।' इति । माधवाचार्येणापि 'प्रमाणत्वाप्रमाणत्वे स्वतः साङ्ख्या: समाश्रिता:' (सर्वदर्शनसङ्ग्रह:, जैमिनिदर्शनम्, पृ.४७६) इत्युक्त्या साङ्ख्यदर्शने द्वयमपि स्वत इति स्पष्टं प्रतिपादितम् । साङ्ख्यशास्त्रानुसारं सर्वविधदोषरहितज्ञानस्य स्वतः प्रामाण्यमभीष्टमिति निर्विवादम्, किन्तु साङ्ख्यमतानुसारमप्रामाण्यमपि स्वत इति कथयितुं साङ्ख्यशास्त्रस्य स्पष्टं प्रमाणं नैवोपलभ्यते । कुमारिलभट्टमाधावाचार्यादिदार्शनिकानां मतप्रमाणात् साङ्ख्यदर्शनमिदं स्वत:प्रामाण्यवादीति वक्तुं शक्यते ।

## न्यायदर्शनाभिमतप्रामाण्यवादविवेक :

उत्पत्तिदृष्ट्या ज्ञप्तिदृष्ट्या च ज्ञानस्य प्रामाण्याप्रामाण्ये बाह्यकारणाधीने स्तः। अयं सिद्धान्तो न्यायाभिमतः परतः प्रामाण्यवादो विद्यते । तत्त्वमीमांसायां ज्ञानमीमांसायाञ्च न्यायदर्शनं वास्तववादस्य समर्थकमस्ति । अयं वास्तववादो

बाह्य-जगतो यथार्थसत्तायां विश्वसिति। वस्तुजगतो वस्तुपरकं ज्ञानं भवतीति तन्मतम्। ज्ञानमपि बाह्यकारणादेव जन्यते। बाह्यकारणयुक्तत्वे सत्येव ज्ञानं प्रामाणिकं भवति। यदा बाह्यकारणं दोषयुक्तं भवति तदा ज्ञानेऽप्रामाण्यं समापतति। न्यायप्रामाण्यवादानुसारं यस्मात् कारणात् ज्ञानमुत्पद्यते तस्मादेव कारणात् प्रामाण्यस्याप्रामाण्यस्य चोत्पत्तिर्नैव भवति। यथा प्रत्यक्षज्ञानोत्पत्ते: सामान्यं करणमिन्द्रियार्थसन्निकर्षो भवति। एतत् प्रत्यक्षं ज्ञानं प्रमारूपमप्रमारूपं वा भवितुमर्हति। ज्ञानास्योत्पत्तौ ज्ञानसामान्यकरणातिरिक्तं विशिष्टं कारणमपि संयुक्तं भवति। यथा घटप्रत्यक्षे इन्द्रियसन्निकर्ष: सामान्यकारणं वर्तते चेत् प्रकाशस्योपलब्धता, नेत्रगतदोषाभावश्चेत्यादिकं तत्प्रत्यक्षज्ञाने विशिष्टं कारणं भवति। एतद्विशिष्टकारणमेव न्यायदर्शने गुणवत्कारणमित्युच्यते। ज्ञानस्य प्रामाण्येऽप्रामाण्ये चैतद्विशिष्टकारणं गुणवत्कारणं वोत्तरदायि भवति। विशिष्टकारणानां दोषवत्त्वे ज्ञानस्याप्रामाण्यं भवति चेत्निर्दोषत्वे ज्ञानास्य प्रामाण्यं भवतीति नैयायिकमतम्। इत्थं ज्ञानस्योत्पत्ति: प्रामाण्यस्य चोत्पत्तिद्वे परस्परभिन्ने। एवमुत्पत्तिदृष्ट्या परतः प्रामाण्यवाद इति न्यायमतम्। न्यायमते ज्ञप्तिदृष्ट्यापि ज्ञानस्य प्रामाण्यस्य च ग्रहणं पृथक्-पृथगेव। ज्ञानगतज्ञप्तिर्ज्ञानोत्पत्त्या सहैव भवति चेद् ज्ञानप्रामाण्यगतज्ञप्तिस्तदनन्तरं भवति। यथा पीतवस्तुनो ज्ञानेन सह पीतत्वज्ञानमपि भवति, किन्तु तत्पीतवर्णस्य यज्ज्ञानं तद्यथार्थमयथार्थं (प्रामाण्यमप्रामाण्यं) वेति ज्ञानन्तु परीक्षणानन्तरमेव भवति। इत्थं ज्ञानज्ञप्तेः स्वतस्त्वेऽपि तत्प्रामाण्याप्रामाण्ययोर्ज्ञप्तिस्तु परत एव भवतीति न्यायदर्शनमतम्। ज्ञानप्रामाण्यस्य परीक्षणं (ज्ञप्तिः) न्यायमतानुसारं त्रिप्रकारेण साधनेन भवति - १. प्रवृत्तिसामर्थ्यम्, २. ज्ञानान्तरसंवादः, ३. गुणवत्कारणज्ञानञ्च।

**१. प्रवृत्तिसामर्थ्यम्** - विषयबोधेन सहैव प्रमातरि ज्ञानविषयिणी प्रवृत्तिरेका समुत्पद्यते, ज्ञानस्य पोषणे यदि सा प्रवृत्ति: समर्था भवति तर्हि ज्ञानस्य प्रवृतिसामर्थ्ययुक्तत्वमुच्यते। यथा घटबोधेन सह ज्ञातरि तस्मिन् घटे जलसङ्ग्रहस्य प्रवृत्तिर्जायते, यदि स ज्ञाता तस्मिन् घटे जलसङ्ग्रहं कर्तुं समर्थो भवति तर्हि ज्ञानस्य प्रवृत्तिसामर्थ्ययुक्तत्वम्, एतस्मात् कारणात् च प्रमाणयुक्तत्वं यथार्थत्वञ्च स्वीक्रियते।

**२. ज्ञानान्तरसंवाद:-** कतिपयज्ञानस्य प्रमाण्यं प्रवृत्तिसामर्थ्यान्नैव भवति किन्तु ज्ञानान्तरसंवादादेव भवति। यथा देवदत्तो जलमानेतुं नदीं गतवान्। एतस्य ज्ञानस्य पुष्टिरन्यस्मात् ज्ञानाद् भवति, यथा तस्मिन् समये देवदत्तो गृहे नास्तीति ज्ञानम्। 'क' इतिज्ञानस्य 'ख' इतिज्ञानेन सह सम्बन्ध एव ज्ञानान्तरसंवादपदेन ज्ञायते।

**३. गुणवत्कारणज्ञानम्-** ज्ञानस्योत्पत्तौ सामान्यं कारणं विशिष्टं कारणञ्चेति द्वे कारणे प्रयुक्ते स्तः। यदि ज्ञानस्य विशिष्टं कारणं दोषपूर्णं स्यात् तर्हि ज्ञानेऽप्रामाण्यं भवेत्, यदि च ज्ञानस्य विशिष्टं कारणं गुणवद् भवेत् तर्हि ज्ञानस्य प्रमाण्यं सिद्ध्यति। यथा 'पीतः शङ्खः' इति ज्ञानं पाण्डुरोगग्रस्तचक्षुर्दोषात् (दोषयुक्तविशिष्टकारणाद्) भवति तर्हि तज्ज्ञानमप्रामाणिकं भवति, अन्यथा तज्ज्ञानं प्रामाणिकमेव भवति। एवमुत्पत्तिदृष्ट्या ज्ञप्तिदृष्ट्या च प्रामाण्याप्रामाण्ययोः परतस्त्वमेवेति न्यायदर्शनाभिमतप्रामाण्यवादनिष्कर्ष:।

## न्यायदर्शनानुसारं स्वत:प्रामाण्यवादनिरास:

न्यायाभिमतप्रामाण्यवादस्य विशदं विवेचनं जयन्तभट्टकृतायां न्यामञ्जर्यामवाप्यते। तत्र स्वतः प्रामाण्यवादखण्डनक्रमे जयन्तभट्टेन प्रोक्तम्- 'तत्र द्वयमपि स्वत इति तावदसाम्प्रतम्, प्रवृत्तस्य विसंवाददर्शनात्। यदि हि प्रामाण्यमितरद् वा स्वत एवं ज्ञानस्य गम्यते तर्हि शुक्तौ रजतज्ञानं प्रमाणतया वा प्रतिपन्नमन्यथा वा ?' (न्यायमञ्जरी-१, पृ.१४७) अर्थात् ज्ञानप्रामाण्याप्रामाण्ययो: स्वतस्त्वे दोष:, यतो हि प्रामाण्याप्रामाण्ययोर्ज्ञानेऽन्तर्भूतत्वे शुक्तिरजतज्ञानस्यापि प्रामाण्यं स्यात्, अप्रामाण्यं वा ? यदि प्रमारूपं तर्हि पश्चान्नेदं रजतमिति न स्यात्, यदि चाप्रमारूपं स्यात् तर्हि रजतार्थिनस्तत्र प्रवृत्तिर्नैव भवेत्। अतो ज्ञाने प्रामाण्याप्रामाण्ययो: स्वतस्त्वमतं नैव समीचीनमिति न्यायमतम्

। एतेन बौद्धाभिमत: स्वतोऽप्रामाण्यवादोऽपि निरस्तः । अर्थाद् यद्यप्रामाण्यज्ञप्ते: स्वतस्त्वं तर्हि (ज्ञातु:) तज्ज्ञानस्यायथार्थत्वं (अप्रामाण्यं) स्वत: स्पष्टमेव स्यात्,तर्हि मिथ्याज्ञाने ज्ञातुः प्रवृत्ति: कथं भवेत् ? तथा चोक्तम्- 'एतेन तृतीयोऽपि पक्ष: प्रत्युक्त:, यदप्रामाण्यं स्वतः, प्रामाण्यं परत इति स्वतो ह्यप्रामाण्ये निश्चिते प्रवृतिर्न प्राप्नोतीति ।'(न्यायमञ्जरी-१,पृ.१४७) अतोऽप्रामाण्यस्य स्वतस्त्वमसिद्धमिति न्यायमतम् । एवमेव मीमांसासम्मत: स्वत:प्रामाण्यवादोऽपि नैयायिकैर्निराकृतोऽस्ति । तथा चोक्तं जयन्तेन- 'स्वत: प्रामाण्यमिति कोऽर्थ: ? किं स्वत एव प्रामाण्यं गृह्णातीति ?'(न्यायमञ्जरी-१, पृ.१५५) तत्र द्वितीयपक्षो नैवोपयुक्त:, यतो हि प्रमाणं स्वयमेवात्मन: प्रामाण्यं ग्रहीतुं न शक्नोति । प्रत्यक्षज्ञानविषयस्य ज्ञानमिन्द्रियार्थसन्निकर्षाज्जायते । यदि प्रत्यक्षेण ज्ञानस्य ग्रहणं न भवति चेत् तत्प्रामाण्यस्य ग्रहणं कथं प्रत्यक्षाद् भवेत् ? ज्ञातताया ग्रहणमिन्द्रियेणापि न भवति, मानसप्रत्यक्षेणापि नैव भवति । एतेन स्वतः प्रामाण्यवाद: खण्डितो भवतीति न्यायमतम् । जयन्तभट्टेन प्रामाण्योत्पत्ते: स्वतस्त्वमपि खण्डितम् । स्वतःप्रामाण्यस्य द्वावेवार्थावुत्पत्तिविषयकस्वतःप्रामाण्यवादः, ज्ञप्तिविषयकस्वतः प्रमाण्यवादश्च । उत्पत्तिपक्षे कार्यस्योत्पत्ति: कारणाधीना, प्रामाण्यमपि कार्यम् । अतः प्रामाण्यस्योत्पत्तौ कारणाधीनता भवति तर्हि प्रामाण्यस्योत्पत्तौ स्वतस्त्वं कथं भवेत् ? प्रामाण्यस्योत्पत्तौ गुणवत्कारणाश्रितत्वात् (तस्य) प्रामाण्यस्योत्पत्ते: स्वतस्त्वं खण्डितं भवति । तथा चोक्तं जयन्तभट्टेन- 'अतः स्वतः प्रामाण्यं भवतीत्येष पक्ष आश्रीयते, सोऽप्ययुक्तः, कार्याणां कारणाधीनजन्मत्वात् प्रामाण्यस्य च कार्यत्वात् । अस्ति च प्रामाण्यं वस्तु च तन्न नित्यमिति कार्यमेव । तत्कार्यञ्च कार्यत्वादेव न स्वतो भवितुमर्हतीति। अथोत्पत्तौ स्वकारकातिरिक्तगुणानपेक्षितत्त्वमेव प्रामाण्यस्य स्वतो भवनमुच्यते न पुनः कार्यत्वमेवेति । तदप्यसम्यक्, सम्यग्रूपस्य कार्यस्य गुणवत्कारकव्यतिरेकेणानिष्पत्ते: । द्विविधं कार्यं भवति सम्यगसम्यक् च । तत्र गुणवता कारणेन सम्यक् कार्यमुत्पद्यते, दोषवता त्वसम्यगिति । निर्दोषं निर्गुणं वापि न समस्त्येन कारणम् । अत एवं तृतीयस्य न कार्यस्यास्ति सम्भव: ॥ सम्यग्ज्ञानोत्पादकं कारकधर्मि स्वरूपातिरिक्तस्वगतधर्मसापेक्षकार्यनिवर्तकमिति, साध्यो धर्म: कारकत्वात् मिथ्याज्ञानोत्पादककारकवत् । सम्यग्ज्ञानं वा धर्मिस्वरूपातिरिक्तधर्मसम्बन्धवत्कारकनिष्पाद्यमिति, साध्यो धर्मः कार्यत्वान्मिथ्याज्ञानवत् । (न्यायमञ्जरी-१, पृ.१५७) एवं न्यायदर्शने स्वत: प्रामाण्यवादो निरस्त: ।

## बौद्धदर्शनाभिमतप्रामाण्यवादविवेकः

बौद्धदर्शनस्य प्रारम्भिकसमये प्रामाण्यवादस्य चर्चा नैवावाप्यते । वसुबन्धुना प्रमाणविवेचनमारब्धम्, दिङ्नागेन प्रमाणसमुच्चयग्रन्थे प्रमाणविवेचनं विहितं स्यात् परन्तु तद्ग्रन्थस्य मूलरूपमधुना नैव प्राप्यते । धर्मकीर्तिनाऽपि प्रमाणवार्तिकग्रन्थे न्यायबिन्दुग्रन्थे च प्रामाण्यस्य विवेचनाभावेऽपि समुल्लेखो विहितोऽस्ति । 'प्रमाणाविसंवादिज्ञानमर्थक्रियास्थिति:, अविसंवादनम्' इत्युक्तेर्ज्ञानस्य प्रामाण्यं कथमिति जिज्ञासायां तेनैवोक्तम् - 'स्वरूपस्य स्वतो गति: प्रामाण्यं व्यवहारेण ।' (प्रमाणवार्तिकम्) अर्थात् ज्ञानं स्वस्वरूपं स्वयमेव गृह्णाति, किन्तु तत्प्रामाण्यस्य बोधो व्यवहारेणैव भवति । एतेन प्रामाण्यवादस्य सङ्केतो मिलति । शान्तरक्षितेन वेदानां पौरुषेयत्वसिद्धये प्रामाण्यवादस्यारम्भो विहित:, यथा -'एवञ्च पौरुषेयत्वे वेदानामुपपादिते । स्वतः प्रामाण्यमप्येषां प्रतिक्षिप्तमयत्नतः ॥' (तत्त्वसङ्ग्रह:) वस्तुतो बौद्धदर्शने वेदानां स्वत:प्रामाण्यं खण्डितमस्ति । तथैव पुनश्चोक्तम्- 'तस्मादर्थक्रियाज्ञानमन्यद्वा समपेक्ष्यते । निश्चयायैव न त्वस्या आधानाय विषादिवत् ॥' (तत्त्वसङ्ग्रह:) अर्थात् प्रामाण्यज्ञानाय संवादज्ञानम्, हेतुशुद्धिज्ञानञ्च साधनद्वयम् । अविसंवादिज्ञानमेव प्रमाणमित्युक्तं धर्मकीर्तिना । अर्थक्रियाज्ञानमभ्यासदशाज्ञानं वाऽविसंवादस्याऽऽशय: । तथा चोक्तम् शान्तरक्षितेन – 'उच्यते वस्तुसंवार:

प्रामाण्यमभिधीयते । तस्य चार्थक्रियाभ्यासज्ञानादन्यन्न लक्षणम् ॥' (तत्त्वसङ्ग्रह:) प्रयोजनसिद्धिरेवार्थाक्रियाप्राप्तिरस्ति । शीतापयनं भोजनपाचमित्यादिकमग्नेरर्थाक्रियाकारितास्ति । अर्थाक्रियाप्राप्तिरेवार्थसंवादोऽस्ति । एवमभ्यासज्ञानेऽपि वस्तुसंवादो भवति । स्वकीयहस्तस्य बारम्बारदर्शनात् -'अयं मम हस्त:' इति ज्ञानेन सह वस्तुसंवादोऽप्यस्ति । अतोऽभ्यासज्ञानेऽपि न काप्याशङ्कोपजायते । एवं बौद्धदर्शनानुसारमर्थक्रियाज्ञानेऽभ्यासज्ञाने च स्वतः प्रामाण्यं भवति। वस्तुतो बौद्धानामनियमपक्षोऽभीष्टो विद्यते । तथा चोक्तं शान्तरक्षितेन - 'येनैकै: स्वत एवेति प्राच्यैर्नियम उच्यते । किञ्चित्स्वतोऽन्यत: किञ्चित् परैश्चानियमो मत: ॥' (तत्त्वसङ्ग्रह: २९८४) अत्र परैरित्यनेन बौद्धैरित्युच्यते । कतिपयमीमांसकानां नियमोऽभिमत: प्रामाण्यं स्वतो भवतीति परं परै: (बौद्धै:) अनियमः स्वीकृतोऽस्ति, किञ्चित् स्वत:, किञ्चिदन्यत: प्रामाण्यं भवतीत्यङ्गीकृतम् । बौद्धमतानुसारं ज्ञानप्रामाण्ये स्वतस्त्वं नैव सिद्ध्यति । स्वतः प्रामाण्यवादिनो बाधकज्ञानस्याभावमेव प्रामाण्यमङ्गीकुर्वन्ति, बाधकज्ञानाभावस्य कृते 'अभाव' नामकस्यापरप्रमाणस्य स्वीकार: क्रियते , पुनर्बाधाभावे यत् प्रमाणान्तरमस्ति तस्य प्रामाणिकत्वमपि बाधाभावादेव भवति। इत्थं बाधकज्ञानस्य निरन्तरमपेक्षया ज्ञानस्य स्वत: प्रामाण्यसिद्धान्तोऽनवस्थादोषग्रस्तोऽस्तीति बौद्धदर्शनस्याक्षेप:। तथा चोक्तम् - 'तथा हि बाधकाभावात् प्रामाण्यं भवतोच्यते । बाधका भावोऽप्यभावाख्यं प्रमाणान्तरमिष्यते ॥ तस्यापि बाधकाभावात् प्रामाण्यमभिधीयते । तत्र तत्रैवमिच्छायां व्यवस्था नोपलभ्यते ॥' (तत्त्वसङ्ग्रह: - ३००३-३००४ इति भारतीय ज्ञानमीमांसा, पृ.२६८) इत्थं स्वत: प्रामाण्यवादस्य खण्डनादेव स्वतोऽप्रामाण्यवादो मण्डितो भवति, अप्रामाण्यस्य प्रामाण्यधीनत्वात् । बौद्धमतानुसारं प्रामाण्यस्य स्वरूपनिष्पत्तावन्यज्ञानस्यापेक्षा न भवति किन्तु ज्ञानप्रामाण्यज्ञप्तावन्यप्रमाणस्यापेक्षा भवति । येन तर्केण ज्ञानप्रामाण्यस्य स्वतस्त्वं सिद्ध्यति तेनैव तर्केण ज्ञानस्य स्वतोऽप्रामाण्यसमर्थनञ्च भवति । यथा मीमांसका: प्रामाण्योत्पत्तिविषये कथयन्ति- यदि प्रामाण्योत्पत्ति: स्वतो नैव संभवति चेत् केनापि प्रकारेण नैवोत्पत्ति:, एवमेवाप्रामाण्यविषयेऽपि कथयन्ति - यद्यप्रामाण्यं स्वत उद्भूतं न भवति चेदन्यकारणादप्रामाण्यस्योत्पत्तिर्नैव संभवति । तथा चोक्तम्- 'किञ्चाप्रामाण्यमप्येवं स्वत एवं प्रसज्यते । न हि स्वतोऽसतस्तस्य कुतश्चिदपि संभवः ॥' (तत्त्वसङ्ग्रह: २८४२ इति भारतीय ज्ञानमीमांसा पृ.२६८) ज्ञानस्य प्रामाण्यनिश्चयोऽन्यसाधनेनैव भवति। इत्थं प्रामाण्याप्रामाण्ययोर्ज्ञप्तिरन्यत एव भवति। तथा चोक्तम्- 'विसंवादनसामर्थ्यं निश्चये तु यथान्यतः । तथा संवादसामर्थ्यं सर्वथाऽतो द्वयं समम् ॥' (तत्त्वसङ्ग्रह: २८४४ इति भारतीयज्ञानमीमांसा, पृ.२६८) यदि प्रामाण्यस्य स्वतस्त्वमङ्गीक्रियते तर्हि त्वप्रामाण्यस्य स्वतस्त्वे को दोष: ? इति बौद्धाः प्रत्याक्षिपन्ति। इत्थं बौद्धमतानुसारं प्रामाण्यस्योत्पत्तिर्न स्वतो न परतः, न चोभयतः, न च प्रामाण्यमहैतुकम् । आर्षज्ञानदृष्ट्या तु प्रामाण्यमनुत्पन्नम्, किन्तु ज्ञप्तिदृष्ट्या प्रामाण्यं परत इति बौद्धाः कथयन्ति । अर्थक्रियाज्ञानात्, हेतुशुद्धिज्ञानाच्च ज्ञानप्रामाण्यनिश्चयो भवतीति तन्मतम् । सन्निकृष्टविषयकज्ञानस्य प्रामाण्यग्रहणमर्थक्रियाज्ञानद्वारा भवति चेदसन्निकृष्टविषयज्ञानस्य प्रामाण्यग्रहणं हेतुशुद्धिज्ञानेन भवति । पुनर्ज्ञानस्याप्रामाण्यविषये बौद्धा: कथयन्ति-ज्ञाने तु स्वरूपतोऽप्रामाण्यमेव । ज्ञानस्य सर्वत्राप्रामाणिकत्वं सामान्यनियमेन सिद्धम्, किन्त्वर्थक्रियाज्ञानेन कारणशुद्धिज्ञानेन चैतदप्रामाण्यं बाधितं भवति । ज्ञानप्रामाण्यस्य बोधो ज्ञातुर्भवति । इत्थं बौद्धमतानुसारं ज्ञानस्याप्रामाण्ये स्वतस्त्वं सिद्ध्यति। बौद्धप्रामाण्यवादविवेचनेनायं निष्कर्षो निस्सार्यते- बौद्धा अप्रमाण्यं स्वतः प्रामाण्यञ्च परत इति स्वीकुर्वन्ति । वस्तुतः प्रामाण्याप्रामाण्यविषयकोऽनिश्चय एवं बौद्धानामभीष्टोऽर्थः । अत: प्रामाण्याप्रामाण्यविषये बौद्धा अनियमवादस्य समर्थकाः सन्तीति दिक् ।

## मीमांसादर्शनाभिमतप्रामाण्यवादविवेकः

स्वर्गादिसाधनभूतयज्ञयागादिप्रतिपादनपरकवेदवाक्यानामूहापोहरूपेण विवेचनमेव मीमांसादर्शनस्योद्देश्यं परिलक्ष्यते । तत्र शब्दस्य प्रमाणत्वविचारप्रसङ्गे मीमांसकैर्ज्ञानमात्रस्य प्रामाण्याप्रामाण्यविवेचनमारब्धमिति जयन्तभट्टेनोल्लिखितम् -'प्रमाणत्वं तु शब्दस्य कथमित्यत्र वस्तुनि । जैमिनीयैरयं तावत्पीठबन्धो विधीयते । प्रामाण्यमप्रामाण्यं वा सर्वविज्ञानगोचरः । स्वतो वा परतो वेति प्रथमं प्रविविच्यताम् ॥' (न्यायमञ्जरी ४६-४७) एतेन प्रामाण्यवादविचार: पूर्वमीमांसादर्शनादेव समारब्ध इति ज्ञायते । कस्यापि वस्तुनो ज्ञानेन सह तज्ज्ञानस्यापि प्रामाण्यनिश्चयो भवतीति मीमांसकाः कथयन्ति । अर्थावबोधनमेव ज्ञानस्य प्रामाणिकत्वमिति सर्वाण्यपि ज्ञानानि स्वभावत: प्रामाणिकानि भवन्ति , अतो ज्ञानानां प्रामाण्यं स्वत: सिद्धमिति मीमांसकमतम् । एवं यदि कस्यापि ज्ञानस्य बाधकमपरं ज्ञानं भवति अथवा कारणे दोषप्रतीतिर्भवति तर्हि तज्ज्ञानं प्रामाणिकं नैव भवति, तदययार्थं मन्यते । एवं बाधज्ञानात् कारणदोषज्ञानाच्च ज्ञानस्याप्रामाण्यनिश्चयो भवतीति कुमारिलमीमांसकमतेऽप्रामाण्यं परत इत्यङ्गीक्रियते ।

## स्वत:प्रामाण्यसिद्धिः

'विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्रमायाः स्वतस्त्वम्' (सर्वदर्शनसङ्ग्रहः, जैमिनिदर्शनम्, पृ.४८३) इति मीमांसादर्शनाभिमतं मतम् । अत्रानुमानप्रमाणञ्च यथा प्रदर्शितम्-'विमता प्रमा विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तजन्या न भवति, अप्रमात्वानधिकरणात्, घटादिप्रमावत् ।' (सर्वदर्शनसङ्ग्रहः, जैमिनिदर्शनम्, पृ.४८३) अर्थाद् विवादग्रस्ता प्रमा ज्ञानसाधारणकारणेनोत्पन्नत्वात् तदतिरिक्तेन कारणेन नैवोत्पद्यते । यतो हि प्रमा नाप्रमेव भवति, घटादिप्रमावद् विज्ञानसामग्रीजन्यैव मन्तव्या । न्यायप्रदर्शितं परतस्त्वसाधकमनुमानञ्च मीमांसकैः खण्ड्यते, यथा- 'न चौदयनमनुमानं परतस्त्वसाधकमिति शङ्कनीयम् । प्रमा दोषव्यतिरिक्तहेत्वतिरिक्तजन्या न भवति ज्ञानत्वादप्रमावदिति प्रतिसाधनग्रहग्रस्तत्वात् । ज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसम्भवे तदतिरिक्तस्य गुणस्य दोषाभावस्य वा कारणत्वकल्पनायां कल्पनागौरवप्रसङ्गाच्च । ननु दोषस्याप्रमाहेतुत्वेन तदभावस्य प्रमां प्रति हेतुत्वं दुर्निवारमिति चेन्न, दोषाभावस्याप्रमाप्रतिबन्धकत्वेनान्यथासिद्धत्वात् ॥' (सर्वदर्शनसङ्ग्रहः, जैमिनिदर्शनम्, पृ.४८३) अर्थादुदयनाचार्येण प्रदर्शितानुमानेन प्रामाण्यस्य परतस्त्वं साध्यत इति शङ्का नैव कार्या । यतो हि 'प्रमा दोषव्यतिरिक्तज्ञानहेत्वतिरिक्तजन्या न भवति ज्ञानत्वादप्रमावदित्यनुमानं सत्प्रतिपक्षहेतुदोषग्रस्तमस्ति । यदि केवलज्ञानसामग्र्यैव प्रमाया उत्पत्तिर्भवितुमर्हति तर्हि तदतिरिक्तगुणस्य दोषाभावस्य वा कारणात्वाङ्गीकारे कल्पनागौरवं भवेत् । यदि च पुनराशङ्क्यते मीमासकै:- कस्यापि दोषस्याप्रमायां कारणत्वमङ्गीक्रियते तदा दोषाभावस्य प्रमाकारणत्वमीङ्गीकरणीयमेव हि । अस्यामाशङ्कायामुच्यते-इयमाशङ्का नैवोचिता, दोषाभावस्तु केवलमप्रमाया: प्रतिबन्धकरूपेणाङ्गीक्रियते, अस्य सिद्धिरपररूपेण भवति, यथा घटपूर्ववृत्तित्वे निश्चितेऽपि दण्डत्वस्य दण्डरूपस्य वा कारणत्वं नैवाङ्गीक्रियते, कारणाभावेऽपि तस्य पूर्ववृत्तित्वनियमस्तु भवत्येव । परं घटस्य कारणं दण्डत्वं दण्डरूपं तु न भवति, किन्तु दण्डस्त्वस्त्येव । दण्डश्च दण्डत्वं दण्डरूपं वा विना नैव भवति । अतो दण्डत्वस्य दण्डरूपस्य वा घटपूर्ववृत्तित्वमवश्यमेव । दण्डत्वादेः सिद्धिरपररूपेण भवति । एतस्यानङ्गीकारे घटासिद्धिर्न भवति । तथैव प्रमाज्ञानस्य पूर्वं नियमतः स्थितत्वेऽपि दोषाभावस्य प्रमाज्ञानकारणत्वं नैव कथयितुं शक्यते, परं तस्य पूर्ववृत्तित्वन्तु भवत्यवश्यम्, यतो हि दोषोऽप्रमायाः कारणमस्ति । दोषे सति प्रमाया उत्पत्तिर्नभवति । इत्थं प्रकारेण यत्र प्रमाया ज्ञानं भवति तत्रैव नियमतः पूर्ववृत्तिदोषाभावोऽप्रमात्मकज्ञानप्रतिबन्धको भवति, अतः प्रमात्मकज्ञानोत्पादने न तस्योपयोगित्वम् । अतो दोषाभावो नैव प्रमाज्ञातस्य करणम्, तस्यान्यथासिद्धत्वात् । अत एवोच्यते-

*'तस्माद् गुणेभ्यो दोषाणामभावस्तदभावतः ।*
*अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोऽनपोदित: ॥'* (सर्वदर्शनसङ्ग्रह: जैमिनिदर्शनम्, पृ.४८४)

यदि प्रमाज्ञानस्य कृते गुणानां कारणत्वानङ्गीकारस्तर्हि गुणानां स्वीकार एव व्यर्थ: स्यादित्याशङ्कानिवारणायोच्यते- तस्माद् गुणेभ्यो दोषाणामभावबोधो भवति, दोषाभावाच्च (संशयविपर्याभावात्) द्विप्रकारकाप्रामाण्ययोः (निश्चितस्याप्रामाण्यस्य, संदिग्धाप्रामाण्यस्य च) सत्ता न भवति । अप्रामाण्याभावे सामान्यप्रामाण्यस्य बहिष्कारो न क्रियते, यतो ह्यपवादाभावे उत्सर्गस्य (सामान्यस्य) शक्तिर्भवति । एवं मीमांसादर्शने उत्पत्तिविषयकप्रामाण्यस्य स्वतस्त्वं प्रमाणितम् ।

एवमेव ज्ञप्तिविषयेऽपि प्रामाण्यस्य स्वतस्त्वमेव मीमांसादर्शनमतम् । तथा चोक्तम्- 'तथा प्रमाज्ञप्तिरपि ज्ञानज्ञापकसामग्रीत एव जायते । न च संशयानुदयप्रसङ्गो बाधक इति युक्तं वक्तुम् । सत्यपि प्रतिभासपुष्कलकारणे प्रतिबन्धकदोषादिसमवधानात् तदुपपत्तेः । किञ्च तावकमनुमानं स्वतः प्रमाणं न वा ? आद्येऽनैकान्तिकता, द्वितीये तस्यापि परत: प्रामाण्यमेवं तस्य, तस्यापीत्यनवस्था दुरवस्था स्यात् ।' (सर्वदर्शनसङ्ग्रहः,जैमिनिदर्शनम्, पृ.४८५) अर्थात् प्रमाया ज्ञप्ति: (प्रामाण्यज्ञानम्) अपि ज्ञानबोधकत्वेन करणेनोपपद्यते, बाह्यानुमानादिकरणेन नैवोत्पत्तिरिति कथनमपि नैव युक्तियुक्तम् । संशयनामकस्य कस्याप्यभावादियं विचारसरणिर्नैवोपयुक्ताऽस्ति । संशयस्य सिद्धिस्तत्रैव भवति यत्र यदि ज्ञान(प्रतिभास)स्योत्पत्तिसर्वकारणानां विद्यमानत्वं स्यात्, तथापि प्रतिबन्धकारणात् (दोषवशात्) तस्य सद्भावो भवति । उदयनाचार्यं प्रति मीमांसका आक्षिपन्ति यथा- किञ्च तावकमनुमानं स्वतःप्रमाणमङ्गीक्रियते न वा ? यदि स्वतः प्रमाणं नाङ्गीक्रियते तर्हि तस्य सिद्धयेऽपरं प्रमाणम्, पुनस्तस्य सिद्धयेऽपरमिति चानवस्थैव स्यात् । यदि चानुमानं स्वतः प्रमाणमित्यङ्गीक्रियते चेत् प्रामाण्यस्य परतस्त्वमिति मतं व्यभिचरितं स्यात् । अतः स्वतः प्रामाण्यमेवाङ्गीकरणीयमिति मीमांसादर्शनाभिमतं मतम् ।

## वेदान्तदर्शनाभिमतप्रामाण्यवादविवेक:

वेदान्तदर्शनास्याधारग्रन्थ उपनिषदस्ति । 'शास्त्रयोनित्वात्' (ब्रह्मसूत्रम् -१/१/३) ब्रह्मणि शास्त्रमेव प्रमाणमिति सूत्रितम् । वस्तुत: प्रामाण्यवादस्य चर्चा ब्रह्मसूत्रेषु नैवास्ति किन्तु वाचस्पतिमिश्रेण न्यायमीमांसादिग्रन्थटीकासु प्रामाण्यवादो विवेचितोऽस्ति । शङ्कराचार्येण 'शास्त्रयोनित्वादितिसूत्रास्य व्याख्यानावसरे 'शास्त्रादेव प्रमाणात् जगतो जन्मादिकारणं ब्रह्माधिगम्यते' इत्युक्तम् । एवमेव 'तत्तुसमन्वयात्'(ब्रह्मसूत्रम्, १/१/४) इत्यत्रापि शङ्कराचार्येणोक्तं यद् - 'न चानुमानगम्यं शास्त्रप्रामाण्यम् ।' एतेन शास्त्रं स्वत: प्रमाणमिति वेदान्तदर्शनाभिमतमतम् । यद्यपि वादरायणप्रणीते ब्रह्मसूत्रे प्रामाण्यविषयकं सूक्ष्मं चिन्तनं नैवोपलब्धम्, ब्रह्मसूत्रशाङ्करभाष्येऽपि शङ्कराचार्येण प्रामाण्यवादो नैव विवेचितस्तथापि प्रकरणग्रन्थकाले विद्यारण्यमुनिना विवरणप्रमेयसङ्ग्रहे, चित्सुखमुनिना तत्त्वप्रदीपिकायाम्, धर्मराजाध्वरीन्द्रेण वेदान्तपरिभाषायाञ्च प्रामाण्यवादो विवेचित: । तदनुसारं वेदान्ता: स्वत एव प्रमाणमिति वेदान्तराद्धान्त: । प्रमाया: स्वतस्त्वं चित्सुखाचार्येण यथाऽङ्गीकृतम् -

*'आहुर्विज्ञानसामग्रीजन्यत्वे सत्यजन्यता ।*
*तदन्यत: प्रमायास्तत्स्वतस्त्वमिति तद्विद: ॥' (तत्त्वप्रदीपिका, प्रथमपरिच्छेद:, पृ.२१५)*

अर्थाद् यद् विज्ञानसामग्रीजन्यत्वे सति तदन्यत:- तदतिरिक्तसामग्रीतोऽजन्यता प्रमायास्तत्स्वतस्त्वं- प्रमास्वतस्त्वमिति तद्विद आहुरिति योजना । अर्थाद् विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्रमाया: स्वतस्त्वमुच्यते । न चैतल्लक्षणमव्याप्तिदोषग्रस्तम्, सर्वप्रमाणानुगमात् । न चाजन्त्वेनेश्वरज्ञानेऽव्याप्तिरित्याशङ्कनीयम्,

तस्याजन्यत्वेऽपि ज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तसामग्रीजन्यत्वं यदप्रमासु प्रसिद्धं तदत्यन्ताभाववत्वं हि लक्षणम्, एतच्चेश्वरज्ञानेऽस्तीति नाव्याप्तिः । अर्थादीश्वरज्ञाने विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तसामग्रीजन्यत्वाभावलक्षणं साध्यमस्ति । नाप्यप्रमायामतिव्याप्तिः, अप्रमाया विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तहेतुजन्यत्वात् । एवं प्रमायाः (प्रामाण्यस्य) स्वतस्त्वेऽनुमानमपि प्रमाणं विद्यते, यथा-

*'प्रमाविज्ञानसामग्रीजन्यत्वे सति नान्यतः ।*
*जायते व्यतिरिक्तत्वादप्रमातः पटादिवत् ॥*

प्रमा विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तजन्या न भवति अप्रमातिरिक्वत्वात् पटादिवत् ।' (तत्त्वप्रदीपिका, प्रथमपरिच्छेदः, पृ.२१६) एवं वेदान्तमते ज्ञानसामग्रीत एव प्रमाया उत्पत्तिर्मन्यते । अतो दोषाभावस्यापि तद्धेतुत्वकल्पना नैवोपयुक्ता । तस्मात् प्रमा विज्ञानसामग्रीमात्रादेव जायत इति सिद्धम् । एवमेव प्रमाज्ञप्तिरपि विज्ञानसामग्रीत एव भवतीति वेदान्तराद्धान्तः । अतो ज्ञप्तिगतस्वतस्त्वं वेदान्तमतम् । अस्मिन् मते सम्भाविताशङ्कामुद्भाव्य समुत्तरयति चित्सुखाचार्यो यथा- 'न च तथात्वे विज्ञान इव प्रमाणमप्रमाणं वेति संशयानुदयप्रसङ्गः, स्वतः प्रमाणत्वेन भवदभिमतधर्मिज्ञानेऽनुव्यवसाये च स्फुरत्यपि सुगतमतानुसारेणामप्रमाणमेवेति विपर्यासदर्शनात् । स्वतः प्रमाणत्वेन भवदङ्गीकृतानुमित्यादावपि ज्ञायमानायो चार्वाकस्य प्रामाण्ये विप्रतिपत्त्युपलब्धेः । स्वरूपभेदवादीनाञ्च गृह्यमाणेऽपि स्थाणोः स्वरूपे स्थाणुर्वा पुरुषो वेति सन्देहस्य पुरुषविपर्ययस्य चोपलम्भात् । सत्यपि प्रतिभासपुष्कलकारणे प्रतिबन्धकदोषादिसमवधानात् तत्र संशयविपर्यासयोरुपपत्तौ प्रकृतेऽपि समं समाधानमन्यत्राभिनिवेशात् । न च ज्ञानज्ञापकादेव प्रामाण्यग्रहणे मिथ्यारजतादिबुद्धिषु प्रामाण्यग्रहणप्रसङ्गः, प्रसक्तस्यापि प्रामाण्यग्रहणस्य कारणदोषावगमबाधबोधाभ्यामपनयात् । न च ताभ्यामपनयने तयोरभावज्ञानस्य प्रामाण्यग्रहणहेतुत्वोपपत्तौ परतः प्रामाण्यापत्तिरिति वाच्यम्, दोषबाधबोधयोरनुदयमात्रेण प्रामाण्यस्फुरणोररीकरणात् । तथा चाहुर्भट्टपादाः -'यदा स्वतः प्रमाणत्वं तदान्यन्नैव मृग्यते । निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः ॥' (श्लोकवार्तिकम् -२/५२) एवं दोषाभावादिज्ञानस्य प्रामाण्यज्ञानहेतुताऽभावो भट्टाचार्यवचनेनापि सिद्ध्यति । अर्थाद् यदा स्वतः प्रमाणत्वमाश्रीयते तदान्यज्ज्ञानग्राहकातिरिक्तं नैव मृग्यते । एवं दोषज्ञानानुदयमात्रादयत्नतो मिथ्यात्वशङ्काऽपि निवर्तते । तस्माद्वेदान्तदर्शनानुसारं प्रामाण्यस्य स्वतस्त्वं सिद्धम् । अत आप्तत्वादिगुणगणं भ्रमादिदोषाभावमनपेक्ष्यैव वेदान्ताः स्वशक्त्यैव स्वार्थमावेदयन्तीति सिद्धम् । तथा च प्रसिद्धिः-

*'इति स्वतस्त्वं परितः प्रसाधितं प्रमाणमात्रस्य स्वतः स्वतो यदा ।*
*निषिद्धपुंदोषकथेषु लीलया समस्तवेदान्तवचस्सु सिद्धयति ॥'*

(तत्त्वप्रदीपिका, नयनप्रसादिनी व्याख्या, प्रथमपरिच्छेदः,पृ.२२६)

एवं प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वमिति चित्सुखमुनिसम्मतो वेदान्तसिद्धान्तः । एवं धर्मराजाध्वरीन्द्रमतेऽपि प्रमाणानां प्रामाण्यं स्वत एवोत्पद्यते, ज्ञायते च । यया सामग्र्या ज्ञानमुत्पद्यते तयैव सामग्र्या प्रामाण्यमुत्पद्यते । एवं विद्यारण्यमतेऽपि प्रामाण्यस्य स्वतस्त्वमेव । प्रामाण्यवादविचारसन्दर्भेऽप्रामाण्यस्य परतस्त्वमिति वेदान्तसिद्धान्तः । अर्थाद् यया ज्ञानसामग्र्या ज्ञानोत्पत्तिर्भवति तेनैव सामग्र्या प्रामाण्यस्योत्पत्तिर्नैव भवति । ज्ञानस्याप्रामाण्यं तु नैव ज्ञानसामग्रीप्रयोज्यम्, प्रमायामप्रामाण्यापत्तेः, किन्तु दोषप्रयोज्यमेव तत् । यथा प्रत्यक्षज्ञानस्योत्पत्तिरिन्द्रियार्थसन्निकर्षादिना भवति । इन्द्रियार्थसन्निकर्षादियदुत्पादकसामग्री, तद्भ्रान्तेरुत्पत्तिकारणं नैव भवति । भ्रान्तिस्तु कामलादीन्द्रियदोषवशाद् भवति । अतोऽप्रामाण्यस्योत्पत्तिः परत एव भवतीति वेदान्तमतम् ।

अप्रामाण्यस्य ज्ञप्तिरपि परत एव भवतीति वेदान्तसिद्धान्तः । अप्रामाण्यं हि स्वाश्रयग्राहकग्राह्यं न भवति, साक्षिणा ग्रहीतुमशक्यत्वात् । यद्यप्रामाण्यं परतो ग्राह्यमित्युच्यते तर्हि कया सामग्र्या तद्ग्रहणमित्याशङ्कायामुच्यते - विसंवादिप्रवृत्त्यादिलिङ्गकानुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते च । अर्थादप्रामाण्यस्य ग्रहणमनुमानादिना भवति । अतोऽप्रामाण्यस्य ज्ञप्तिरपि परत एवेति वेदान्तसिद्धान्तः । एवं वेदान्तसिद्धान्तानुसारं प्रामाण्यस्य स्वतस्त्वम्, अप्रामाण्यस्य च परतस्त्वमिति युक्तिपूर्वं निरूपितम् ।

## निष्कर्ष :

वेदवाक्यानां प्रामाणिकत्वविषयकप्रश्नादेव पौरस्त्यदर्शनक्षेत्रे प्रामाण्यवादः सुविकसितः । प्रमाणयुक्तत्वं यथार्थत्वं वा प्रामाण्यस्य तात्पर्यम् । प्रामाणिकत्वाभावे ज्ञानं प्रमाकोटौ नैवागच्छति । अत: पौरस्त्यज्ञानमीमासायां ज्ञानप्राप्तिसाधनभूतानां प्रत्यक्षादिप्रमाणानां निरूपणेन सह तज्जन्यज्ञानस्य प्रामाण्याप्रामाण्यविषये विशदं विवेचनं समुपलब्धम् । ज्ञानप्रामाण्यविषये स्वत:प्रामाण्यवाद: परतः प्रामाण्यवादश्चेति मतद्वैविध्यं दग्गोचरीभूतमस्ति । यया ज्ञानसामग्र्या ज्ञानमुत्पद्यते तयैव सामग्र्या प्रामाण्यमप्युत्पद्यत इत्युत्पत्तिदृशा स्वतःप्रामाण्यवादस्याशय एवं ज्ञानान्तरे एव तस्य प्रामाण्याप्रामाण्ये निहिते स्त: । एवमेव ज्ञप्तिदृशाऽपि स्वतस्त्वस्य तात्पर्यमस्ति यद् - येन साधनेन ज्ञानस्य ग्रहणं भवति तेनैव साधनेन ज्ञानप्रामाण्यस्य ग्रहणं भवति । एतद्विपरीतं परतः प्रामाण्यवादमतमस्ति । उत्पत्तिदृशा, ज्ञप्तिदृशा च ज्ञानस्य पराश्रिततत्वमेव परतः प्रामाण्यवादस्याशयः । यथा प्रत्यक्षज्ञानस्योत्पत्तिरिन्द्रियार्थसन्निकर्षादिना भवति चेत् तस्य प्रामाण्योत्पत्तिर्गुणवत्कारणभावाद् भवति । इत्थं ज्ञानस्य ग्रहणंमनुव्यवसायाद् भवति चेज्ज्ञानप्रामाण्यस्य ग्रहणं प्रवृत्तिसामर्थ्याद् भवतीति परतः प्रामाण्यवादिमतम् । ज्ञानानां प्रामाण्यमप्रामाण्यञ्च स्वत एव भवतीति साङ्ख्यदर्शनमतम् । एतद्दर्शनानुसारमुत्पत्तिदृशा ज्ञप्तिदृशा च ज्ञानस्य प्रामाण्यमप्रामाण्यञ्च स्वत एव । ज्ञातृपुरुषस्य चैतन्यरूपत्वात् प्रमाप्रमारूपज्ञानभेदं स्वयमेव जानातीति साङ्ख्यमतम् । एवं ज्ञानानां प्रामाण्यमप्रामाण्यञ्चोभयमपि परत भवतीति न्यायदर्शनमतम् । एतन्मतानुसारं ज्ञानस्य प्रामाण्यमप्रामाण्यञ्चोत्पत्तिदृशा ज्ञप्तिदृशा चान्यत एव । ज्ञानं प्रमात्मकमप्रमात्मकञ्च भवति । यदा गुणवत्कारणेन ज्ञानमुत्पद्यते तदा तज्ज्ञानं प्रमारूपं (यथार्थं) भवति । यदा च ज्ञानोत्पत्तौ गुणवत्कारणदोषयुक्तत्वं भवति तदा तज्ज्ञानमप्रमारूपं (अयथार्थं) भवति । एवञ्च ज्ञानप्रामाण्यस्य ग्रहणमपि ज्ञानान्तरसंवादात् प्रवृत्तिसामर्थ्याद् वा भवतीति परतः प्रामाण्यवादिनैयायिकमतनिष्कर्षः। ज्ञानानां प्रामाण्यं परतः, अप्रामाण्यञ्च स्वत इति सौगतमतम् । एतन्मतानुसारं प्रत्येकज्ञानस्योत्पत्तावप्रामाण्यं (दोषयुक्तत्वम्) एव भवति, किन्तु साधनादिद्वारा ज्ञाता ज्ञाने प्रामाण्यमुत्पादयति । एवमेव प्रामाण्यस्य ग्रहणं (ज्ञप्तिः) अपि बाह्यकारणाश्रितं भवति, किन्त्वप्रामाण्यस्य ज्ञप्तिस्तु स्वत एव भवति । एतन्मतं न केवलं बौद्धानामपितु जैनानामपि विद्यते । प्रामाण्यसन्दर्भे बौद्धा जैनाश्चानियमवादिन: सन्ति । ज्ञानस्य प्रामाण्यमप्रामाण्यञ्चोभयमपि उत्पत्तिदृशा ज्ञप्तिदृशा च कुत्रचित् स्वतः कुत्रचिच्च परत इत्यनियमः । इत्थं बौद्धमतानुसारं प्रामाण्यस्योत्पत्तिर्न स्वत:, न परतः, नोभयतः, नचाहैतुकी । आर्षज्ञानदृष्ट्या प्रामाण्यमनुत्पन्नमेव । ज्ञप्तिदृशा तु प्रामाण्यं परत एवेति बौद्धमतम् । एतन्मते ज्ञानस्य प्रामाण्यनिश्चयोऽर्थक्रियाज्ञानाद् हेतुशुद्धिज्ञानाच्च भवति । सन्निकृष्टविषयकज्ञानस्य प्रामाण्यग्रहणमर्थक्रियाज्ञानद्वारा भवति चेदसन्निकृष्टविषयकज्ञानस्य प्रामाण्यग्रहणं हेतुशुद्धिज्ञानाद् भवति । पुनः ज्ञानस्याप्रामाण्यविषये बौद्धाः कथयन्ति यद्- ज्ञानं तु स्वरूपतोऽप्रामाणिकमेव । ज्ञानस्य सर्वत्राप्रामाणिकत्वं सामान्यनियमसिद्धम्, किन्त्वर्थक्रियाज्ञानात् तथा करणशुद्धिज्ञानात् तदप्रामाण्ये बाधिते सति प्रामाण्यबोधो भवति । इत्थं ज्ञानस्याप्रामाण्ये स्वतस्त्वमिति बौद्धमतम् । एवमप्रामाण्यस्य स्वतस्त्वं प्रामाण्यस्य च परतस्त्वमिति बौद्धमतनिष्कर्षः । पूर्वमीमांसकाः प्रामाण्यं स्वतः अप्रामाण्यञ्च

परत इत्यङ्गीकुर्वन्ति। वेदानां स्वतःप्रामाण्यसिद्धये मीमांसकैर्ज्ञानस्य स्वतः प्रामाण्यवादः प्रतिपादितोऽवलोक्यते। अतो मीमांसकाः प्रामाण्यस्य विषये स्वतस्त्ववादिनः, अप्रामाण्यविषये च परतस्त्ववादिनो विद्यन्ते। एतन्मतानुसारं सत्यत्वं ज्ञानस्य स्वाभाविकं लक्षणमस्ति। अतः प्रत्येक ज्ञानं मूलरूपे सत्यमेव किन्तु बाह्यकारणाद् ज्ञानेऽप्रमात्वमुत्पद्यते। एवमेव ज्ञानस्य प्रामाण्यग्रहणं (यथार्थताया ज्ञप्तेर्वा ग्रहणम्) अपि स्वत एव भवति, किन्त्वप्रामाण्यस्य (अयथार्थत्वस्य) परीक्षणं ज्ञानादन्यत एव करणीयमिति मीमांसामतनिष्कर्षः। एवमेव मीमांसादर्शनवद् वेदान्तदर्शनमपि प्रामाण्यं स्वतः अप्रामाण्यञ्च परत इति स्वीकरोति। वेदान्तमतानुसारं प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वं सिद्धम्। अर्थाद् येन सामान्यकारणेन ज्ञानस्योत्पत्तिर्भवति तेनैव कारणेन प्रामाण्यस्योत्पत्तिर्भवति। येन साक्षिज्ञानेन ज्ञानस्य ग्रहणं भवति तेनैव साक्षिज्ञानेन ज्ञानप्रामाण्यस्यापि ग्रहणं भवति। पुनश्च ज्ञानाप्रामाण्यं परत इति कथयन्ति वेदान्तिन। एतच्चाप्रामाण्यं कारणदोषात् (विशिष्टकरणदोषात्) समुत्पद्यते। एतस्याप्रामाण्यस्य ग्रहणं (ज्ञप्तिः) अपि परतः (अनुमानादिना) भवति। अतो वेदान्तमतानुसारमप्रामाण्यमुत्पत्तिदृशा ज्ञप्तिदृशा च परत एव सिद्ध्यति। एवं ज्ञानानां प्रमाणत्वाप्रमाणत्वे विकसितं प्रामाण्यवादविषयकं पौरस्त्यदार्शनिकचिन्तनमत्र संक्षेपेण विवेचितम्, तत्तद्दर्शनाभिमतप्रामाण्यवादवैशिष्ट्यञ्चात्र पृथक् पृथगेव निर्धारितमिति दिक्॥

## सन्दर्भग्रन्थसूची


तत्त्वप्रदीपिका, (ई.सं. २००५), चित्सुखमुनिः, वाराणसी : चौखम्बा विद्या भवन।

तत्त्वसङ्ग्रहः (ई. सं. २०६८), आचार्यः शान्तरक्षितः, वाराणसी : बौद्धभारती

न्यायदर्शनम्, (२०२६), मिश्रः, नारायणः, वाराणसी : चौखम्बा संस्कृत संस्थान।

न्यायमञ्जरी, (ई.सं.१९८२), भट्टः, जयन्तः, वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।

प्रमाणसमुच्चयः ( ) दिङ्नागः, मैसूर : मैसूर विश्वविद्यालय प्रकाशन।

प्रशस्तपादभाष्यम्, (ई.सं.१९९७), प्रशस्तपादः, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालयः।

बौद्धदर्शनमीमांसा (ई.सं.२०१४), उपाध्याय, बलदेवः, वाराणसी : चौखम्बा विद्याभवन।

भारतीय ज्ञानमीमांसा (ई.सं.२०१६) सिन्हा, नीलिमा, दिल्ली: आर. पी. जैन।

भारतीय दर्शन में प्रमाण (ई. सं. १९९८), वेदालङ्कारः जयदेवः, वाराणसी : भारतीय विद्या प्रकाशन।

मीमांसाश्लोकवार्तिकम् (ई.सं. १९९०), भट्टः, कुमारिलः त्रिवेन्द्रम् : सी.वी. एच. पब्लिकेसन।

विवरणप्रमेयसङ्ग्रहः, (ई.सं. २०१२), विद्यारण्यमुनिः वाराणसीः भारतीय विद्या प्रकाशन।

वेदान्तपरिभाषा (ई.सं.२०१०), धर्मराजाध्वरीन्द्रः, हि.व्या. श्रीगजाननः, वाराणसी : चौखम्बा विद्याभवन।

शाङ्करवेदान्तकोशः, (ई.सं.१९९८), पाण्डेयः, मुरलीधरः, वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

सर्वदर्शनसङ्ग्रहः (ई.सं. २००४), माधवाचार्यः, वाराणसी : चौखम्बा विद्याभवन।

साङ्ख्यकारिका (ई.सं. २००१), ईश्वरकृष्णः, वाराणसी : चौखम्बा विद्याभवन।


❋❋❋